## ५२. उदरवेदना

ह्यः / परह्य/ श्वः /परश्वः
आरभ्य

रोगी - महाभाग ! महती उदरवेदना अस्ति। किमपि औषधं ददातु।

वैद्याः - उद्वेगः मास्तु। कदा आरभ्य उदरवेदना ?

रोगी - ह्यः आरभ्य उदरवेदना, मुखे रुचिः एव नास्ति।

वैद्यः - ह्यः कुत्र गतवान्, किं किं खादितवान् ?

रोगी - परह्यः मातुलस्य गृहं गतवान्। तत्र सा मधुरं कृतवती। अहं यथेष्टं खादितवान्।

वैद्यः - चिन्ता मास्तु, अहम् औषधं ददामि।

रोगी - किञ्चित् शिरोवेदना अपि अस्ति। बुभुक्षा एव नास्ति। मुखे रुचिः अपि नास्ति।

वैद्यः - भवतः अजीर्णं जातम्। श्वः, परश्वः निमित्तम् औषधं ददामि। प्रपरश्वः पुनः आगच्छतु।

रोगी - श्वः आहारं किं स्वीकरोमि ?

वैद्यः - श्वः परश्वः, प्रपरश्वः घनाहारंवः घनाहारं न अधिकं द्रवाहारं स्वीकरोतु।

रोगी - अस्तु, प्रपरश्वः पुनः आगच्छामि। कति रूप्यकाणि।

वैद्याः - प्रथमवारम् इति ५० रूप्यकाणि ददातु। प्रपरश्वः चेत् २५ रूप्यकाणि एव !